न पीयूषं पतत्यग्नौ न च वायुः प्रधावति । पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम् । अपानमूर्द्ध्वमाकृष्य मूलबन्धोऽभिधीयते । अपानप्राणयोरैक्यं क्षये मूत्रपुरीषयोः । युवा भवति वृद्धोऽपि सततं मूलबन्धनात्” । एवमन्यान्यपि शास्त्रोक्तानि कर्म्माणि आयुर्वृद्धिकराणि “मत्स्यान् मोचयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते” “आयुष्यं प्राङ्मुखोभुङ्क्ते” इत्यादीनि ।

रसवत् अन्यान्यपि द्रव्याणि सेवितानि आयुर्वृद्धिकराणि सुश्रुते दर्शितानि तानि रसतुल्यतया रसायनानि यथा “अथातः सर्व्वोपघातशमनीयं रसायनं व्याख्यास्यामः । पूर्व्वे वयसि मध्ये वा मनुष्यस्य रसायनम् । प्रयुञ्जीत भिषक् प्राज्ञः स्निग्धशुद्धतनोः सदा । नाविशुद्धशरीरस्य युक्तो रासायनो विधिः । न भाति वाससि क्लिष्टे रङ्गयोग इवाहितः । शरीरस्योपघाता ये दोषजा मानसास्तथा । उपदिष्टाः प्रदेशेषु तेषां वक्ष्यामि वारणम् । शीतोदकं पयः क्षौद्रं सर्पिरित्येकशो द्विशः । त्रिशः समस्तमथ वा प्राक् पीतं स्थापयेद्वयः । तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत शीततोयं चानुपिबेदेवमहरहर्मासं तदेव मधुयुक्तं भल्लातककाथेन वा मधुद्राक्षाकाथयुक्तं वा मध्वामलकरसाभ्यां वा गुडूचीकाथेन वा । एवमेते पञ्च प्रयोगा भवन्ति जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात् । एते खल्वर्शांसि क्षपयन्ति क्रमीनुपघ्नन्ति ग्रहणधारणशक्तिं जनयन्ति मासेमासे प्रयोगे वर्षशतमायुषोऽभिवृद्धिर्भवति । विडङ्गतण्डुलानां द्रोणं पिष्टपचने पिष्टवदुत्स्वेद्य विगतकषायं खिन्नमवतार्य्य दृषदि पिष्टमायसे दृढे कुम्भे मधूदकोत्तरं प्रावृषि भस्मराशावन्तर्गृहे चतुरो मासान्निदध्यात् वर्षाविगमे चोद्धृत्योपसंस्कृतशरीरः सहस्रसम्पाताभिहुतं कृत्वा प्रातः प्रातर्यथाबलमुपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेनाल्पस्नेहेन घृतवन्तमोदनमश्नीयात् पांशुशय्यायां शयीत । तस्य मासादूर्द्ध्वं सर्व्वाङ्गेभ्यः क्रमयो निःक्रामन्ति तानणुतैलेनाभ्यक्तस्य वंशविदलेना पहरेत् । द्वितीये पिपीलिकास्तृतीये यूकास्तथैवापहरेत् चतुर्थे दन्तनखरोमाण्यवशीर्य्यन्ते पञ्चमे प्रशस्तगुणलक्षणानि जायन्ते । अमानुषं चादित्यप्रकाशं वपुरधिगच्छति दूराच्छ्रवणानि दर्शनानि चास्य भवन्ति रजस्तमसी चापोह्य सत्त्वमधितिष्ठति । श्रुतिनिगाद्यपूर्व्वोत्पादी गजबलोऽश्वजवः पुनर्युवा द्वौ वर्षशतान्यायुरवाप्नोति । तस्याणुतैलमभ्यङ्गार्थे । अजकर्णकषायमुत्सादनार्थे सौवीरं, कूपोदकं स्नानार्थे, चन्दनमुपलेपनार्थे, भल्लातकविधानवदाहारः परिहारश्च । काष्ठशय्यायां निष्कुलीकृतानामेष एव कल्पः पांशुशय्याभोजनवर्ज्जम् । अत्र हि पयसा घृतेन भोक्तव्यम् आशिषश्च पूर्व्वेण समानाः । शोणितपित्तनिमित्तेषु विकारेषु तेषामुपयोगः । यथोक्तमागारं प्रविश्य बलामूलार्द्धपलं पलं वा पयसालोड्य पिबेत् । जीर्णे पयः सर्पिरोदनइत्याहारः । एवं द्वादशरात्रमुपयुज्य द्वादश वर्षाणि वयस्तिष्ठति । एवं दिवसशतमुपयुज्य वर्षशतं वयस्तिष्ठति । एवमेवातिबलानागबलाविदारीशतावरीणामुपयोगः । विशेषतस्त्वतिबलामुदकेन, नागबलाचूर्णं मधुना, विदारीचूर्णं वा क्षीरेण, शतावरीमप्येवं, पूर्व्वेणान्यत् समानमाशिषश्च समाः । एतास्त्वौषधयो बलकामानां शोणितं छर्दयतां विरिच्यमानानां चोपदिश्यन्ते । वाराहीमूलतुलाचूर्णं कृत्वा ततोमात्रां मधुयुक्तां पयसालोड्य पिबेत् जीर्णे पयःसर्पिरोदनइत्याहारः । प्रतिषेधोऽत्र पूर्व्ववत् क्रियाप्रयोगमुपसेवमानो वर्षशतमायुरवाप्नोति स्त्रीषु चाक्षयताम् । एतेनैव चूर्णेन पयोऽवचूर्णं घृतशीतमभिमथ्याज्यमुत्पाद्य मधुयुतमुपयुञ्जीत सायम्प्रातरेककालं वा जीर्णे पयःसर्पिरोदन इत्याहारः । एवं मासमुपयुज्य वर्षशतायुर्भवति । जीर्णे पयः सर्पिरोदन इत्याहारः । चक्षुःकामः प्राणकामो वा वीजकसाराग्निमन्थमूलं निःक्वाथ्य माषप्रस्थं साधयेत् तस्मिन् सिध्यति चित्रकमूलानामक्षमात्रं कल्कं दद्यादामलकरसचतुर्थभागं ततः खिन्नमवतार्य्य सहस्रसम्पाताभिहुतं कृत्वा शीतीभूतं मधुसर्पिर्भ्यां संसृज्योपयुञ्जीत यथाबलं लवणं परिहरन् भक्षयेत् जीर्णे मुद्गामलकयूषेणालवणेन घृतवन्तमोदनमश्नीयात् पयसा वा मासत्रयमेवमाभ्यां प्रयोगाभ्यां चक्षुःसौपर्णं वङ्गवत्यनल्पबलो बलवान् स्त्रीषु चाक्षयो वर्षशतायुर्भवतीति । भवति चात्र । पयसा सह सिद्धानि नरः सनफलानि यः । भक्षयेत् पयसा सार्द्धं वयस्तस्य न शीर्य्यते ।

अथातो मेधायुष्कामीयं रसायनं चिकित्सितं व्याख्यास्यामः । मेधायुःकामः श्वेतवल्गुजफलान्यातपपरिशुष्काण्यादाय सूक्ष्मचूर्णानि कृत्वा गुडेन सह समालोड्य स्नेहकुम्भे सप्तरात्रं धान्यराशौ निदध्यात् सप्तरात्रादुद्धृत्य कृतदोषस्य यथाबलं पिण्डं प्रयच्छेद्-दुदिते सूर्य्ये उष्णोदकं चानुपिबेत् । भल्लातकविधान-